Email: homasonline@gmail.com
Website: www.homas.in
www.homas.org
Homas
the spiritual way to success
K. Krishna Prasad Bhat
+918000858858
+919940406777

अथ प्रणवप्रसङ्गात् शक्तिप्रणवमन्त्रविधिश्च कल्पान्तरोक्तोत्र लिख्यते—

ईश ऋषिः। पंक्तिश्छन्दः। शक्तिभैरवी देवता। आं हृत्। ईं शिरः। इत्यादिर्दीर्घस्वरषट्कैरङ्गानि। (ध्यानम्—)

प्रकाशमध्यस्थितचित्स्वरूपां वराभये संदधतीं त्रिणेत्राम्।
सिन्दूरवर्णामतिकोमलाङ्गीं मायामयीं तत्वमयीं नमामि॥

ध्यानान्तरम्—

कल्पद्रुमूलमणिकुट्टिमसंनिविष्टां मुक्तातपत्रकृतमौक्तिकवृष्टिहृष्टाम्।
इष्टाभये विदधतीमरुणां त्रिणेत्रां इष्टाभये भगवतीमनुशीलयामः॥

ईं इति मन्त्रः सबिन्दुकः चतुर्थः स्वरः। एकविंशतिलक्षं जपेत्। दशांशमाज्यैर्हुनेत् पुरश्चरणार्थम्॥ अत्यैश्वर्यफलप्रधानोयं मन्त्रः।

अथ पूजा—प्राक् नवमे पटले भुवनेशीविधानोक्तपीठे समावाह्य समर्चयेत्। एकशक्तित्वादावरणादयो न सन्ति। अथ भुवनेश्वरीत्रिगुणित-विधानोक्तवत् संपूजयेत्॥

अथास्य मन्त्रस्य न्यासविधिः—

ऐं ह्रीं श्रीं सुप्रबोधैकनाथश्रीपादुकां पूजयामि। ऐं ह्रीं श्रीं रक्ताम्बा-पादश्रीपादुकां पूजयामि। बीजत्रयादि शुक्लाम्बापादश्रीपादुकामित्यादि० निष्कलानन्दनाथ श्रीपादुकेत्यादि० सकलानन्दनाथ श्रीपादुकेत्यादि० नवात्मा-नन्दनाथ श्रीपादुकेत्यादि० अक्रूरानन्दनाथ श्रीपादुकेत्यादि० इति मूर्ध्नि तत्रैव वामे दक्षिणे पूर्वदक्षिणपश्चिमोत्तरेषु विन्यसेत्। सर्वत्र बीजत्रयादि च। पुनः सच्चिदानन्दपरमशिवसंविदे नमः। चिदानन्दपरमशिवसंविदे नमः। आनन्दानन्दपरमशिवसंविदे नमः। इति नाभौ तद्वामे तद्दक्षिणे च बीज-त्रयाद्येवं न्यसेत्॥ पुनः ईं नमः इति मूलमन्त्रेण नाभिहृदयभ्रूमध्येषु न्यस्त्वा पुनः सपरमार्थात्मकबिन्दुद्वङ्कितवक्त्रश्रीपादुकां पूजयामि० बिन्दुद्वयाङ्कितस्तनयुगल श्रीपादुकां पूजयामि० सपरमार्धकबिन्दुव्यञ्जितरेखायोनिश्रीपादुकां पूजयामीति बीजत्रयादिमुखस्तनयुगळयोनिषु न्यस्य, पुनर्मूलमन्त्रेण षट्त्रिंशद्वारं प्राणायामं कृत्वा, लिपिन्यास करन्यास व्यापकाङ्गऋष्यादीन्कृत्वा जपेत्॥